শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৫১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৫১

*অঘাসুরৱধৱর্ণনম্*

কদাচন ৱ্রজশিশুভিঃ সমং ভৱান
  ৱনাশনে ৱিহিতমতিঃ প্ৰগেতরাম্।
সমাৱৃতো বহুতরৱতসমগুলৈঃ
  সতেমনৈর্নিরগমদীশ জেমনৈঃ॥ ১ ॥

ৱিনির্যতস্তৱ চরণাম্বুজদ্বযা-
  দুদঞ্চিতং ত্ৰিভুৱনপাৱনং রজঃ।
মহৰ্ষযঃ পুলকধরৈঃ কলেবরৈ-
  রুদূহিরে ধৃতভৱদীক্ষণোতসৱাঃ॥ ২ ॥

প্ৰচারযত্যৱিরলশাদ্বলে তলে
  পশূন্ ৱিভো ভৱতি সমং কুমারকৈঃ।
অঘাসুরো ন্যরুণদঘায ৱর্তনীং
  ভযানকঃ সপদি শযানকাকৃতিঃ॥ ৩ ॥

মহাচলপ্ৰতিমতনোৰ্গুহানিভ-
  প্ৰসারিতপ্ৰথিতমুখস্য কাননে।
মুখোদরং ৱিহরণকৌতুকাদ্গতাঃ
  কুমারকাঃ কিমপি ৱিদূরগে ত্বযি॥ ৪ ॥

প্ৰমাদতঃ প্ৰৱিশতি পন্নগোদরং
  ক্বথত্তনৌ পশুপকুলে সৱাতসকে।
ৱিদন্নিদং ত্বমপি ৱিৱেশিথ প্ৰভো
  সুহৃজ্জনং ৱিশরণমাশু রক্ষিতুম্॥ ৫ ॥

www.prapatti.com

গলোদরে ৱিপুলিতৱর্ষ্মণা ত্ৱযা
মহোরগে লুঠতি নিরুদ্ধমারুতে।
দ্রুতং ভৱান্ ৱিদলিতকণ্ঠমণ্ডলো
ৱিমোচযন্ পশুপপশূন্ ৱিনির্যযৌ॥ ৬ ॥

ক্ষণং দিৱি ত্ৱদুপগমার্থমাস্থিতং
মহাসুরপ্রভৱমহো মহো মহত্।
ৱিনির্গতে ত্ৱযি তু নিলীনমঞ্জসা
নভঃস্থলে ননৃতুরথো জগুঃ সুরাঃ॥ ৭ ॥

সৱিস্মযৈঃ কমলভৱাদিভিঃ সুরৈ-
রনুদ্রুতস্তদনু গতঃ কুমারকৈঃ।
দিনে পুনস্তরুণদশামুপেযুষি
স্ৱকৈর্ভৱানতনুত ভোজনোতসৱম্॥ ৮ ॥

ৱিষাণিকামপি মুরলীং নিতম্বকে
নিৱেশযন্ কবলধরঃ করাম্বুজে।
প্রহাসযন্ কলৱচনৈঃ কুমারকান
বুভোজিথ ত্রিদশগণৈর্মুদা নুতঃ॥ ৯ ॥

সুখাশনং ত্ৱিহ তৱ গোপমণ্ডলে
মখাশনাত্ প্রিযমিৱ দেৱমণ্ডলে।
ইতি স্তুতস্ত্রিদশৱরৈর্জগতপতে
মরুতপুরীনিলয গদাত্ প্রপাহি মাম্॥ ১০ ॥

**********

www.prapatti.com